शिखी विषसन्दर्शनान्नृप ! अन्नञ्च सविषं राजञ्छिरेण च विपद्यते । तदा भवति निःस्राव्यं पत्वपर्युषितोपमम् । व्यापन्नरसगन्धञ्च चन्द्रिकाभिस्तथायुतम् । व्यञ्जनानान्तु शुष्कत्वं द्रवाणां बुद्बुदोद्भवः । ससैन्धवानां द्रव्याणां जायते फेनमालिता । सस्यराजिश्च ताम्रा स्यात् नीला च पयसस्तथा । कोकिलाभा च मद्यस्य तोयस्य च नृपोत्तम ! धान्याम्लस्य तथा कृष्णा कपिला कोद्रवस्य च । मधुश्यामा च तक्रस्य नीला पीता तथैव च । घृतस्योदकसङ्काशा कपोताभा च सक्तुनः । हरिता माक्षिकस्यापि तैलस्य च तथाऽरुणा । फलानामप्यपक्वानां पाकः क्षिप्रं प्रजायते । प्रकोपश्चैव पक्वानां माल्यानां म्लानता तथा । मृदुता कठिनानां स्यात् मृदूनाञ्च विपर्ययः । सूक्ष्माणां रूपदलनं तथा चैवातिरक्तता । श्याममण्डलता चैव वस्त्राणां वै तथैव च । लोहानाञ्च मणीनाञ्च मलपङ्कोपदिग्धता । अनुलेपनगन्धानां माल्यानाञ्च नृपोत्तम ! । विगन्धता च विज्ञेया तथा राजन् ! जलस्य तु । दन्तकाष्ठत्वचः श्यामास्तनुसत्वास्तथैव च । एवमादीनि चिह्नानि विज्ञेयानि नृपोत्तम ! । तस्माद्राजा सदा तिष्ठेत् मणिमन्त्रौषधीगणैः । उक्तैः संरक्षितो राजा प्रमादपरिवर्जकः । प्रजातरोर्मूलमिहावनीशस्तद्रक्षणाद्राष्ट्रमुपैति वृद्धिम् । तस्मात् प्रयत्नेन नृपस्य रक्षा सर्वेण कार्या रविवंशचन्द्र !" दुर्गशुभाशुभलक्षणञ्च कालिकापुराणे ८५ अ॰ यथा

दुर्गांस्तु सततं कुर्य्यात् प्राकाराट्टालतोरणैः । भूषितान्नगराद्राजा दुर्गं दुर्गाश्रयं चरेत् । दुर्गं बलं नृपाणान्तु नित्यं दुर्गं प्रशस्यते । शतमेको योधयति दुर्गस्थायी धनुर्धरः । शतं दशसहस्राणि तस्मात् दुर्गं प्रशस्यते । जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च । अरण्यवनदुर्गञ्च शैलजं परिखोद्भवम् । दुर्गं कार्यं नृपतिना यथायोग्यं स्वदेशतः । दुर्गं कुर्वन् पुरं कुर्य्यात् त्रिकोणं धनुराकृति । वर्तुलं वा चतुष्कोणं नान्यथा नगरं चरेत् । मृदङ्गाकृति दुर्गञ्च सततं कुलनाशनम् । यथा राक्षसराजस्य लङ्का दुर्गाजिता पुरा । बलेः पुरी शोणिताख्या तेजो दुर्गं प्रतिष्ठितम् । यतस्तत् व्यजनाकारमतो भ्रष्टः श्रियो बलिः । सौभाग्यं शाल्वराजस्य नगरं पञ्चकोणकम् । दिवि यद्वर्त्तते राजंस्तच्च भ्रष्टं भविष्यति । यच्चायोध्याह्वयं भूप ! पुरमिक्ष्वाकुभूभुजाम् । धनुराकृति तच्चापि ततोऽभूद्विजयप्रदम् । दुर्गभूमौ यजेद्दुर्गां दिक्पालांश्चैव द्वारतः । पूजयित्वा विधानेन जयं भूपः समाप्नुयात् । अतो दुर्गं नृपः कुर्य्यात् सततं जयवृद्धये" । अधिकं दुर्गकर्मशब्दे द्रष्टव्यम्

२ असुरभेदे तत्कथा काशीख॰ ७० अ॰

"दुर्गोनाम महादैत्यो रुरुदैत्याङ्गजोऽभवत् । यतस्तप्त्वा तपस्तीव्रं पुंभ्योऽजेयत्वमाप्तवान् । ततस्तेनाखिला लोका भूर्भुवःस्वर्मुखा अपि । स्वसात्कृता विनिर्जित्य रणे स्वभुजसारतः !" ३ देवीभेदे स्त्री

दुर्गासुरहननात् देव्या दुर्गेति नामाभूत् यथाह तत्रैव ७२ अ॰ "अद्य प्रभृति मे नाम दुर्गेति ख्यातिमेष्यति । दुर्गदैत्यस्य समरे पातनादतिदुर्गमात्" दुर्गासुरस्यैव नामान्तरं दुर्गम इति । "तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् । दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति" देवीमा॰ । तत्र-शाकम्बरीप्रादुर्भावयुगे स च वैवस्वतमन्वन्तरे चत्वारिंशत्तमयुगकालः यथोक्तं लक्ष्मीतन्त्रे वैवस्वतमन्वन्तरमुक्त्वा "तस्मिन्नेवान्तरे शक्र ! चत्वारिंशत्तमे युगे" शताक्षीशाकम्भर्य्योरवतारमुक्त्वा तत्रैव दुर्गासुरबधेन दुर्गानामताप्राप्तिरुक्ता । तेन श्वेतवराहकल्पे साऽद्यापि न प्रादुर्भूता कल्पान्तरे तस्याः प्रादुर्भावेण तस्या इदानीमर्चनीयतेति बोध्यम् । दुर्गाशब्दस्यान्यापि निरुक्तिरन्यत्र दर्शिता प्रसङ्गादिहोच्यते यथा

"दुर्गो दैत्ये ४महाविघ्ने ५भवबन्धे ५कुकर्मणि । ७शोके ८दुःखे च ९नरके १०यमदण्डे च ११जन्मनि । १२महाभयेऽतिरोगे १४चाप्याशब्दो हन्तृवाचकः । एतान् हन्त्येव या देवी सा दुर्गा परिकीर्तिता" । अपिच "दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः । उकारो विघ्ननाशस्य वाचको वेदसम्मतः । रेफो रोगघ्नवचनो गश्च पापघ्नवाचकः । भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः । स्मृत्युक्तिश्रवणाद् यस्या एते नश्यन्ति निश्चितम् । ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्तिता" । "दुर्गेति दैत्यवचनोऽप्याकारो नाशवाचकः । दुर्गं नाशयते या तु सा दुर्गा परिकीर्तिता" । विपत्तिवाचको दुर्गश्चाकारो नाशवाचकः । तं ननाश पुरा तेन बुधैर्दुर्गा प्रकीर्त्तिता" । अस्याः स्थानं कृष्णावेनातुङ्गभद्रयो र्मध्यभागे सह्याद्रेरीषत्प्राच्यां प्रसिद्धम् । "सर्वस्वरूपिणी शक्तिः सा दुर्गेति च पठ्यते" यथा मुण्डमालायाम् "भूतानि दुर्गा भुवनानि दुर्गा नराः स्त्रियश्चापि सुरा सुरादिकम् । यद्दृश्यते दृश्यं खलु सैव दुर्गा दुर्गास्वरू-